# 2. दुर्बुद्धिः विनश्यति

**Question 2:**

एकपदेन उत्तरत-

(क) कूर्मस्य किं नाम आसीत्?

(ख) सरस्तीरे के आगच्छन्?

(ग) कूर्मः केन मार्गेण अन्यत्र गन्तुम् इच्छति?

(घ) लम्बमानं कूर्मं दृष्ट्वा के अधावन्?

Answer:

(क) कम्बुग्रीव।

(ख) धीवराः

(ग) कूर्मः आकाशमार्गेण अन्यत्र गन्तुम् इच्छति।

(घ) गोपालकाः

**Question 3:**

अधोलिखितवाक्यानि कः कं प्रति कथयति इति लिखत-

www.dreamtopper.in

| | | **कः कथयति** | **कं प्रति कथयति** |
|---|---|---|---|
| यथा | प्रातः यद् उचितं तत्कर्तव्यम्। | हंसौ | कूर्मं प्रति |
| (क) | अहं भवद्भ्यां सह आकाशमार्गेण गन्तुम् इच्छामि। | -------------------- | -------------------- |
| (ख) | अत्र कः उपायः? | -------------------- | -------------------- |
| (ग) | अहम् उत्तरं न दास्यामि। | -------------------- | -------------------- |
| (घ) | यूयं भस्म खादत। | -------------------- | -------------------- |

Answer:

| | | **कः कथयति** | **कं प्रति कथयति** |
|---|---|---|---|
| यथा | प्रातः यद् उचितं तत्कर्तव्यम्। | हंसौ | कूर्मं प्रति |
| (क) | अहं भवद्भ्यां सह आकाशमार्गेण गन्तम इच्छामि। | कर्मः | हंसौ प्रति |

| | | |
|---|---|---|
| (ख) अत्र क: उपाय:? | हंसौ | कूर्मम् प्रति |
| (ग) अहम् उत्तरं न दास्यामि। | कूर्म: | हंसौ प्रति |
| (घ) यूयं भस्म खादत। | कूर्म: | गोपालाकान् प्रति |

### Question 4:

मञ्जूषात: क्रियापदं चित्वा वाक्यानि पूरयत-

अभिनन्दति भक्षयिष्याम: इच्छामि वदिष्यामि उड्डीयते प्रतिवसति स्म

(क) हंसाभ्यां सह कूर्मोऽपि --------------------।

(ख) अहं किञ्चिदपि न --------------------।

(ग) य: हितकामनां सुहृदां वाक्यं न --------------------।

(घ) एकः कूर्म: अपि तत्रैव --------------------।

(ङ) अहम् आकाशमार्गेण अन्यत्र गन्तुम् --------------------।

(च) वयं गृहं नीत्वा कूर्मं --------------------।

Answer:

(क) हंसाभ्यां सह कूर्मोऽपि उड्डीयते ।

(ख) अहं किञ्चिदपि न वदिष्यामि ।

(ग) य: हितकामनां सुहृदां वाक्यं न अभिनन्दति ।

(घ) एकः कूर्म: अपि तत्रैव प्रतिवसति स्म ।

(ङ) अहम् आकाशमार्गेण अन्यत्र गन्तुम् इच्छामि ।

(च) वयं गृहं नीत्वा कूर्मं भक्षयिष्याम:।

www.dreamtopper.in

### Question 5:

पूर्णवाक्येन उत्तरत-

(क) कच्छप: कुत्र गन्तुम् इच्छति?

(ख) कच्छप: कम् उपायं वदति?

(ग) लम्बमानं कूर्मं दृष्ट्वा गोपालका: किम् अवदन्?

(घ) कूर्म: मित्रयो: वचनं विस्मृत्य किम् अवदत्?

Answer:

(क) कच्छप: हंसाभ्यां सह आकाशमार्गेण अन्यत्र स्थाने गन्तुम् इच्छति।

(ख) कच्छप: उपायं वदति "युवां काष्ठदण्डम् चञ्चवा धारयतम्। अहं काष्ठदण्डमध्ये अवलम्ब्य युवाभ्यां पक्षबलेन सुखेन गमिष्यामि।"

(ग) लम्बमानं कूर्मं दृष्ट्वा गोपालका: अवदन् "हं हो! महदाश्चर्यम्। हंसाभ्यां सह कूर्मोऽपि उड्डीयते।"

(घ) कूर्म: मित्रयो: वचनं विस्मृत्य अवदत् "भस्म खादत"।

### Question 6:

घटनाक्रमानुसारं वाक्यानि लिखत-

(क) कूर्म: हंसयो: सहायतया आकाशमार्गेण अगच्छत्।

(ख) गोपालका: अकथयन्-वयं पतितं कूर्मं खादिष्याम:।

(ग) कूर्म: हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

(घ) केचित् धीवरा: सरस्तीरे आगच्छन्।

(ङ) कूर्म: अन्यत्र गन्तुम् इच्छति स्म।

(च) लम्बमानं कूर्मं दृष्ट्वा गोपालका: अधावन्।

(छ) कूर्म: आकाशात् पतित: गोपालकै: मारितश्च।

(ज) 'वयं श्व: मत्स्यकूर्मादीन् मारयिष्याम:' इति धीवरा: अकथयन्।

Answer:

(क) कूर्म: हंसौ च एकस्मिन् सरसि निवसन्ति स्म।

(ख) केचित् धीवरा: सरस्तीरे आगच्छन्।

(ग) 'वयं श्व: मत्स्यकूर्मादीन् मारयिष्याम:' इति धीवरा: अकथयन्।

(घ) कूर्म: अन्यत्र गन्तुम् इच्छति स्म।

(ङ) कूर्म: हंसयो: सहायतया आकाशमार्गेण अगच्छत्।

(च) लम्बमानं कूर्मं दृष्ट्वा गोपालका: अधावन्।

(छ) गोपालका: अकथयन्-वयं पतितं कूर्मं खादिष्याम:।

(ज) कूर्म: आकाशात् पतित: गोपालकै: मारितश्च।

**Question 7:**

मञ्जूषात: पदानि चित्वा रिक्तस्थानानि पूरयत-

जलाशयम् अचिन्तयत् वृद्ध: दु:खिता: कोटरे वृक्षस्य सर्प: आदाय समीपे

एकस्य वृक्षस्य शाखासु अनेके काका: वसन्ति स्म। तस्य वृक्षस्य ------------------- एक:

सर्प: अपि अवसत्। काकानाम् अनुपस्थितौ ------------------- काकानां शिशून् खादति स्म।

काका: ------------------- आसन्। तेषु एक: ------------------- काक: उपायम् -------------------।

वृक्षस्य ------------------- जलाशय: आसीत्। तत्र एका राजकुमारी स्नातुं ------------------- आगच्छति।

शिलायां स्थितं तस्या: आभरणम् ------------------- एक: काक: वृक्षस्य उपरि अस्थापयत्।

राजसेवका: काकम् अनुसृत्य ------------------- समीपम् अगच्छन्। तत्र ते तं सर्पं च अमारयन्।

अत: एवोक्तम्-उपायेन सर्वं सिद्धयति।

Answer:

एकस्य वृक्षस्य शाखासु अनेके काका: वसन्ति स्म। तस्य वृक्षस्य <u>कोटरे</u> एक:

सर्प: अपि अवसत्। काकानाम् अनुपस्थितौ <u>सर्प:</u> काकानां शिशून् खादति स्म।

काका: <u>दु:खिता:</u> आसन्। तेषु एक: <u>वृद्ध:</u> काक: उपायम् <u>अचिन्तयत्</u>।

वृक्षस्य <u>समीपे</u> जलाशय: आसीत्। तत्र एका राजकुमारी स्नातुं <u>जलाशयम्</u> आगच्छति।

शिलायां स्थितं तस्या: आभरणम् <u>आदाय</u> एक: काक: वृक्षस्य उपरि अस्थापयत्।

राजसेवका: काकम् अनुसृत्य <u>वृक्षस्य</u> समीपम् अगच्छन्। तत्र ते तं सर्पं च अमारयन्।

अत: एवोक्तम्-उपायेन सर्वं सिद्धयति।

www.dreamtopper.in